# महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय

**Maharshi Panini Sanskrit Evam Vedic Vishwavidyalaya**

देवासमार्ग, उज्जैन,(मध्यप्रदेश) . 456010

Website:- www.mpsvv.ac.in

# 5.2.4

## $Q_L$M

**Details of the Programme for the exchange/participation of students at national/international level for academic and cultural activities with other institutions.**

**विश्वविद्यालयान्तरेण अन्यया संस्थया सह वा राष्ट्रिय-अन्ताराष्ट्रियस्तरेषु शैक्षिकसांस्कृतिकगतिविधीनां कृते छात्राणां विनिमयाय सञ्चालितस्य कार्यक्रमस्य विवरणम् ।**

REGISTRAR
MAHARSHI PANINI SANSKRIT EVAM VEDIC VISHWAVIDYALAYA
UJJAIN (M.P.)

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयेन संस्कृतशिक्षण-प्रशिक्षणज्ञानविज्ञानसंवर्धनकेन्द्रेण च समये समये विभिन्नसंस्थाभिः सह मिलित्वा शैक्षणिकसांस्कृतिकक्रियाः आयोज्यते। यथा- लेखनं, पठनं, ललितकला आदय:। एतेन छात्राः अन्यसंस्थाभिः सह मेलितुं नूतनावकाशात् शिक्षितुं च साहाय्यं कुर्वन्ति। तथा च छात्रः नूतनान् विचारान् प्राप्नोति, मनसि किमपि नूतनं चिन्तयितुं अवसरं च प्राप्नोति।

विश्वविद्यालयस्य दृष्टिः वैश्विकी वर्तते। अयं सर्वाभिः विभिन्नप्रकारैः संस्कृतोच्चसंस्थाभिः साकं बहुमधुरमेवं च रुचिकरं सम्बद्धं बहति। अस्य विश्वविद्यालयस्य छात्राः इतरैः संस्कृतसंस्थाभिः अथवा नाना संस्कृतविश्वविद्यालयैः नैकेषु आयोजितेषु कार्यक्रमेषु भागं गृह्णन्ति। अथ च **'अमृतस्य पुत्राः वयम्'** इति भावनामुद्दिश्य सर्वे छात्राः विभिन्नेषु कार्यक्रमेषु भागं नीत्वा कार्यं कुर्वन्ति। एवञ्च विभिन्नायोजितासु प्रतियोगितासु प्रतिभागं स्वीकृत्य तत्र भिन्नानि भिन्नानि स्थानानि अपि लभ्यन्ते। समग्र भारतवर्षे केन्द्रियसंस्कृतविश्वविद्यालयस्य नैके शाखाः दृश्यन्ते। तत्र भोपालपरिसरः अन्यतमः। तत्र प्रत्येकवर्षे आयोजितराज्यस्तरीयस्पर्धायां विश्वविद्यालयस्य छात्राः सोत्साहेन भागं गृह्णन्ति। अपि च सम्भूय उत्कर्षमहोत्सवं महता वैभवेन प्रतिवर्षं समाचरन्ति। एतादृशेषु कार्यक्रमेषु अस्य विश्वविद्यालयस्य समे शिक्षकाः छात्राः च सम्भूय संस्कृतकार्यक्रमान् सञ्चालयन्ति। अग्रिमेषु दिवसेषु अध्ययनार्थमपि छात्राणां विनिमयः भवतु इति चिन्तनं प्रवर्तते। अधुना अस्माकं विश्वविद्यालयात् स्नातक-स्नातकोत्तर-शिक्षाञ्च सम्प्राप्य अग्रे अनुसन्धानादिकार्यसम्पादनाय विश्वविद्यालयान्तरं गच्छन्ति। पुनः अन्यस्मात् विश्वविद्यालयात् उत्तर-मध्यमा, अथवा स्नातकशिक्षाम् अवाप्य शास्त्री, शिक्षाशास्त्री, आचार्य, विद्यावारिधि आदिप्रकाराणाम् उच्चशिक्षां प्राप्तुमत्र समायन्ति। यद्यपि एतद्विषये विनिमयानुबन्धः नैव कृतः तथापि प्राकृतिकरूपेण एव छात्राणाम् अध्ययनार्थं गमनागमनं वर्तते।

**'एकभारतं श्रेष्ठभारतम्'** इति घोषवाक्यं 2019 तमे वर्षे प्रकटीकृतम् । एतदनु विश्वविद्यालयात् प्राय: पञ्चाशत्सङ्ख्यकानां छात्राणां सामान्यविश्वविद्यालयेषु सांस्कृतिकविनिमययोजनानुगुणं प्रेषणाय विश्वविद्यालयेन सकलाः सिद्धताः कृताः । विरामदिवसेषु ग्रीष्मावकाशेषु च छात्राः विश्वविद्यालयान्तरं गत्वा तत्रत्येषु क्रियाकलापेषु भागं गृह्णन्ति पुनः तत्र स्वसंस्कृतिं परिचाययन्ति चेत् महान् लाभः भवति इति मत्वा एतादृशां छात्राणां विनिमयाय योजनाः कृताः आसन्। परन्तु **'कोरोना(Covid-19)'** कारणेन एताः योजनाः हठादेव स्थगिताः । इदानीं पुनः विश्वविद्यालयेन एतादृशाः प[illegible] आरभ्यन्ते।

वस्तुतः **'बान्धवाः शिवभक्ताश्च स्वदेशो भुवनत्रयम्'** इति भावनया अस्माकं सर्वेऽपि छात्राः इतरविश्वविद्यालयानां युवसमारोहेषु प्रातिभसमारोहेषु च भागं गृह्णन्ति। बहुमुखी संस्कृतिः कीदृशी इति विज्ञाय तदनु सांस्कृतिकमूल्यानां ग्रहणे एवं प्रकारेण कार्यक्रमाः भृशमुपकुर्वन्ति। शैक्षिकसांस्कृतिकगतिविधीनां माध्यमेन विश्वविद्यालयः राष्ट्रियस्तरे प्रसिद्धो वर्तते। विश्वविद्यालयस्य बहुषु स्थानीयेषु कार्यक्रमेषु अनौपचारिकरूपेण परस्परं छात्राणां विनिमयो जायते। ग्रीष्मावकाशे यदा विश्वविद्यालये संस्कृतशिक्षणप्रशिक्षणवर्गस्य आयोजनं क्रियते तदा इतरेषामपि महाविद्यालयानां, संस्कृतमहापाठशालानां च छात्राः विश्वविद्यालयम् आयान्ति। महाविद्यालये संस्कृतशिक्षणप्रशिक्षणवर्गस्य आयोजनावसरे अस्य विश्वविद्यालयस्य वरिष्ठाः छात्राः अथ च अध्यापकाः तत्र गत्वा महाविद्यालयान् अन्यान् छात्रान् पाठयन्ति। विश्वविद्यालयस्य परिसरः सामाजिकसंस्कृतप्रचारपरैः संघटनैः सह सर्वदा मधुरं सम्बन्धं स्थापयति। अनेन समाजोन्मुखं भूत्वा संस्कृतकार्यं मम कार्यम् इति मत्वा छात्राः संस्कृतशिविराणि अन्यान् कार्यक्रमान् च आयोजयन्ति।

REGISTRAR
MAHARSHI PANINI SANSKRIT EVAM VEDIC VISHWAVIDYALAYA
UJJAIN (M.P.)

एवं प्रादेशिकानां राष्ट्रियाणां च कार्यक्रमाणां सञ्चालने छात्राणां विनिमयादिषु विश्वविद्यालयः सर्वदा उत्साहं वर्धयति ।

# महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय

## Maharshi Panini Sanskrit Evam Vedic Vishwavidyalaya

देवासमार्ग, उज्जैन,(मध्यप्रदेश) . 456010

Website:- www.mpsvv.ac.in






केन्द्रीयसंस्कृतविश्वविद्यालयः, देहली

(संसदः अधिनियमेन स्थापितः)

भारतसर्वकारस्य अनुदानेन सञ्चालिता

६०तमी अखिलभारतीयशास्त्रीयस्पर्धा

(२०८० विक्रमसंवत्सरस्य चैत्रशुक्लस्य प्रतिपत्तः चतुर्थी यावत्)

२२-२५ मार्च २०२३

प्रमाणपत्रम्

श्री/सुश्री/श्रीमती उद्धव पौराणिक

महर्षि पाणिनिसंस्कृतवैदिकविश्वविद्यालयः, उज्जैन, म.प्र.

इत्यत्र अधीयानः/अधीयाना छात्रः/छात्रा

केन्द्रीयसंस्कृतविश्वविद्यालयेन काशीहिन्दूविश्वविद्यालयस्य

वैदिकविज्ञानकेन्द्रे आयोजितायाम्

न्यायभाषणम् इति स्पर्धायां द्वितीयस्थानम् प्राप्त्।

| | | |
|---|---|---|
| प्रो. ललित कुमार त्रिपाठी<br>निदेशकः<br>गङ्गानाथझापरिसरः, प्रयागराजः<br>संयोजकः | डॉ. मधुकेश्वरभट्टः<br>निदेशकः<br>प्रकाशनकार्यक्रमः, के.सं.वि.<br>राष्ट्रियसंयोजकः | प्रो. श्रीनिवास वरखेड़ी<br>कुलपतिः<br>केन्द्रीयसंस्कृतविश्वविद्यालयः,<br>देहली |



### अखिलभारतीयशास्त्रीयस्पर्धायां पाणिनिसंस्कृत-विश्व-विद्यालयस्य छात्रेण श्रीउद्धवपौराणिकेन रजतपदकं लब्धम्

(वृत्तप्रेषक: डॉ.दिनेश: चौबे)

नवदेहलीस्थकेंद्रीयसंस्कृत विश्वविद्यालयस्य तत्वावधाने काश्याम् आयोजितायाम् अखिल-भारत-स्तरीय शास्त्रीय-प्रतियोगितायाम् उज्जयिनीस्थ-महर्षिपाणिनि संस्कृत-वैदिक-विश्व-विद्यालयस्य न्यायदर्शन-विभागस्य छात्रेणश्री उद्धव-पौराणिकेन न्यायभापण प्रतियोगितायां गदाधरीय-पञ्च लक्षण्यां द्वितीय-लक्षणेसाध्य भावादिकर्णत्वं केन-सम्बन्धेन इति" विपये द्वितीय-स्थानं रजतपदकं च् प्राप्तम्।

अस्यां प्रतियोगितायां आभारतात् नाना संस्थाभ्य: समागता: छात्रा: भागं वहन्ति । प्रदेशस्तरे चित: छात्रा: एव अत्र भागं स्वीकुर्वन्ति ।अस्मिन् अवसरे विश्वविद्यालयस्य मान्य:कुलपति: आचार्य-विजयकुमार-सीजीवर्य: उपस्थित: आसीत् तेनोक्तं यत् विश्व-विद्यालयस्य छात्राणां प्रदर्शनं उत्तमम् आसीत् अस्माकं छात्रा:सर्वत्र सर्वविधासु प्रतियोगितासु स्वप्रातिभं प्रदर्शितवन्त: पदकानि च अर्जितानि ।कुलपतिवर्येण छात्राणाम् आचार्याणाञ्च अभिनंदनं कृतम् । एवञ्च विश्वविद्यालयस्य नीताशर्मा , शिवांश-शुक्ल:, अवनीशशर्मा, वैदिक-जोशीभि: छात्रै: विविधासु स्पर्धासु प्रतिभागं कृतवन्त:। अवसरेऽस्मिन् संस्कृत-विश्व-विद्यालयस्य कुलपतय:, विद्वांस: आचार्या:, छात्रा:, अन्यजनाश्च उपस्थिता: आसन्।

**काशीहिन्दूविश्वविद्यालये वाराणस्याम् अखिलभारतीयशास्त्रीयस्पर्धायां महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य न्यायविभागस्य छात्रेण उद्धवपौराणिकेन न्यायभाषणप्रतियोगितायां द्वितीयस्थानं प्राप्तम् -22/03/2023**

REGISTRAR
MAHARSHI PANINI SANSKRIT EVAM VEDIC VISHWAVIDYALAYA
UJJAIN (M.P.)






राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः (आ.प्र.)

(संसदः अधिनियमेन संस्थापितः केन्द्रीयविश्वविद्यालयः)

वाग्वर्धिनीपरिषत्

प्रथमः अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोहः – 2023

(राष्ट्रियसंस्कृतविद्यापीठत्वेन यशस्वितया चतुर्दशसमारोहसम्पत्त्यनन्तरम्)

1st All India Sanskrit Students' Talent Festival – 2023

From 19.04.2023 to 22.04.2023

प्रमाणपत्रम्

सामोदं प्रमाणीक्रियते यत् महर्षिपाणिनीसंस्कृतविश्वविद्यालयः, उज्जैन इति संस्थायाः आ-II वर्षीयच्छात्रः / छात्रा / श्रीमान् / कुमारी उद्धव पौराणिक तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयस्य वाग्वर्धिनीपरिषदा समायोजिते प्रथमे अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोहे शैक्षिक/सांस्कृतिक/क्रीडास्पर्धासु न्यायभाषण – स्पर्धायां भागमगृह्णात्। तत्र द्वितीयं स्थानं लब्ध्वा स्वर्ण/रजत/कांस्यपदकेन सभाजितः/सभाजिता इति।

डा. शिन्दे मनोज अङ्गदः
सहसमायोजकः

डा. कनपाल कुमारः
समायोजकः

आचार्यः जि.एस्.आर्.कृष्णमूर्तिः
कुलपतिः

22.04.2023



# अखिलभारतीय संस्कृतच्छात्रप्रातिभ-समारोहे पाणिनिसंस्कृत-विश्व-विद्यालयस्य छात्राः पुरुस्कृताः

(वृत्तप्रेषकः डॉ.दिनेशः चौबे)

तिरूपतिस्थराष्ट्रियसंस्कृत विश्वविद्यालये आयोजिते अखिलभारतस्तरीय संस्कृतच्छात्र-प्रतिभासमारोहे उज्जयिनीस्थ-महर्षिपाणिनि संस्कृतवैदिक-विश्व-विद्यालयस्य न्यायदर्शनविभागस्य छात्रेणश्री उद्धवपौराणिकेन न्यायभाषण प्रतियोगितायां द्वितीयस्थानं रजतपदकं च् प्राप्तम्। अस्यां प्रतियोगितायां वेदान्तभाषणे सुश्री नीताशर्मा तृतीयं स्थानं कास्यपदकं च अर्जितवती एवञ्च रसप्रश्न स्पर्धायां सुश्रीनिधीशर्मा, सुश्रीनीताशर्मा च तृतीयं स्थानं प्राप्तवत्यौ आभारतात् नाना संस्थाभ्यः समागताः छात्राः अत्र भागं गृहीतवन्तः।

अस्मिन् अवसरे विश्वविद्यालयस्य मान्यनीयकुलपतिः आचार्य-विजयकुमार-सीजीवर्यः उक्तवान् यत् अस्माकं विश्वविद्यालयस्य छात्राः देशे सर्वत्र नाना संस्थासु गत्वा पुरस्काराः अर्जयन्ति विश्वविद्यालयस्य गौरवं च वर्धितवन्तः। अस्माकं छात्राःसर्वत्र सर्वविधासु प्रतियोगितासु स्वप्रातिभं प्रदर्शितवन्तः। कुलपतिवर्येण मुदितमनसा छात्राणाम् आचार्याणाञ्च अभिनंदनं कृतम्।

अवसरेऽस्मिन् तिरुपति- राष्ट्रियसंस्कृतविश्वविद्यालयस्य प्रातिभसमारोह-समापन-महोत्सवे अनुग्रहभाषणार्थं पूज्य-जगद्गुरवः श्रीश्रीशङ्कर-विजयेन्द्र-सरस्वती शङ्कराचार्य-स्वामिनःउपस्थिताः आसन्। येषां कर-कमलाभ्यां छात्राः पुरुस्कृताः। अस्मिन् अवसरे संस्कृत-विश्वविद्यालयस्य, कुलपतिः विद्वांसः आचार्याः, छात्राः, अन्यजनाश्च उपस्थिताः आसन्। छात्रदलस्य नेतृत्वं साहित्यविभागस्य आचार्येण श्रीआयुपदीक्षितेन कृतम्।

**राष्ट्रियसंस्कृतविश्वविद्यालयतिरुपतौ अलिखभारतीयसंस्कृतच्छात्रप्रातिभसमारोहे महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य न्यायविभागस्य छात्रेण उद्धवपौराणिकेन न्यायभाषणप्रतियोगितायां द्वितीयस्थानं प्राप्तम् -19/04/2023**

REGISTRAR
MAHARSHI PANINI SANSKRIT EVAM VEDIC VISHWAVIDYALAYA
UJJAIN (M.P.)





















**केन्द्रियसंस्कृतविश्वविद्यालयभोपालपरिसरे महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य**

**छात्राः विभिन्नप्रतियोगितायां भागं गृहीतवन्तः 2022-23**

REGISTRAR
MAHARSHI PANINI SANSKRIT EVAM VEDIC VISHWAVIDYALAYA
UJJAIN (M.P.)

# महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय

## Maharshi Panini Sanskrit Evam Vedic Vishwavidyalaya

देवासमार्ग, उज्जैन,(मध्यप्रदेश) . 456010

Website:- www.mpsvv.ac.in





















**केन्द्रियसंस्कृतविश्वविद्यालयभोपालपरिसरे महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य**

**छात्राः विभिन्नप्रतियोगितायां भागं गृहीतवन्तः 2022-23**

REGISTRAR
MAHARSHI PANINI SANSKRIT EVAM VEDIC VISHWAVIDYALAYA
UJJAIN (M.P.)

# महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय

## Maharshi Panini Sanskrit Evam Vedic Vishwavidyalaya

देवासमार्ग, उज्जैन,(मध्यप्रदेश) . 456010

Website:- www.mpsvv.ac.in



केन्द्रियसंस्कृतविश्वविद्यालयभोपालपरिसरे महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य छात्रैः सह साहित्यविभागाध्यक्षः डॉ. तुलसीदासपरौहामहोदयः



केन्द्रियसंस्कृतविश्वविद्यालयभोपालपरिसरात् आगतैः विजेताछात्रैः सह महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालस्य मा. कुलपतिः आचार्यविजयकुमार सी.जी. महोदयः विभागाध्यक्षः च

REGISTRAR
MAHARSHI PANINI SANSKRIT EVAM VEDIC VISHWAVIDYALAYA
UJJAIN (M.P.)

# महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय

**Maharshi Panini Sanskrit Evam Vedic Vishwavidyalaya**

देवासमार्ग, उज्जैन,(मध्यप्रदेश) . 456010

Website:- www.mpsvv.ac.in





**शासकीयदिग्विजयस्वशासीस्नातकोत्तर-महाविद्यालयः राजनांदगांव (छ.ग.) इत्यस्य छात्राः महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालये शैक्षणिक भ्रमणार्थम् आगतवन्तः**

**03/02/2023**



दैनिक भास्कर उज्जैन 04-02-2023

## छत्तीसगढ़ कॉलेज के विद्यार्थियों ने किया संस्कृत विवि में भ्रमण

शैक्षणिक भ्रमण पर संस्कृत विश्वविद्यालय आए छात्र-छात्राएं।

भास्कर संवाददाता | उज्जैन

शासकीय दिग्विजय महाविद्यालय राजनांदगांव (छत्तीसगढ़) के विद्यार्थी एवं अध्यापक शैक्षणिक भ्रमण के लिए महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय आए। भ्रमण के दौरान कुलपति प्रो. विजयकुमार सीजी द्वारा दल का विश्वविद्यालय की शोध पत्रिका पाणिनिया प्रदान कर स्वागत एवं सम्मान किया गया। इस मौके पर उन्होंने कहा किसी भी विश्वविद्यालय या महाविद्यालय के विद्यार्थियों में सीखने की प्रवृत्ति को इस तरह के भ्रमण से ही बढ़ाया जा सकता है। विद्यार्थी भ्रमण के दौरान दृश्यों के आधार पर मिलने वाले ज्ञान से अधिक लाभान्वित होते हैं, जो ज्ञान उनके मानसिक पटल पर चिरस्थायी रहता है। भ्रमण के दौरान विद्यार्थियों ने विश्वविद्यालय परिसर सहित पुस्तकालय में रखे प्राचीन ग्रंथों का अवलोकन भी किया, जहां पुस्तकालय सहायक डॉ. प्रीति उपाध्याय ने उनका मार्गदर्शन किया। विद्यार्थियों ने परिसर में स्थित शिवालय एवं अन्य स्थलों का भी भ्रमण किया। भ्रमण में शासकीय दिग्विजय महाविद्यालय के संस्कृत विभाग के विभागाध्यक्ष डॉ. दिव्य देशपांडे भी उपस्थित रहे। इस दौरान विश्वविद्यालय के छात्र कल्याण अधिष्ठाता डॉ. शुभम शर्मा, वेद एवं व्याकरण विभागाध्यक्ष डॉ. अखिलेश द्विवेदी एवं संकल्प मिश्र मार्गदर्शन के लिए उपस्थित रहे।

REGISTRAR
MAHARSHI PANINI SANSKRIT EVAM VEDIC VISHWAVIDYALAYA
UJJAIN (M.P.)

# महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय

## Maharshi Panini Sanskrit Evam Vedic Vishwavidyalaya

देवासमार्ग, उज्जैन,(मध्यप्रदेश) . 456010

Website:- www.mpsvv.ac.in



















कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालये रामटेकनागपुरे महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य

कुलपतीनां, शिक्षकानां, छात्राणां च शैक्षणिकभ्रमणम् 2022-23

REGISTRAR
MAHARSHI PANINI SANSKRIT EVAM VEDIC VISHWAVIDYALAYA
UJJAIN (M.P.)







जीवाजीविश्वविद्यालये ग्वालियरे मध्यप्रदेशे युवमहोत्सवे

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य छात्राणां प्रतिभगिता

REGISTRAR
MAHARSHI PANINI SANSKRIT EVAM VEDIC VISHWAVIDYALAYA
UJJAIN (M.P.)